अनुक्रमांकः ..................................
निरीक्षकस्य हस्ताक्षरम् ..........................

**Paper Code**
**MV-202**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – मईमासः – 2019**

**एम.ए. संस्कृत–व्याकरणम्, (सत्रम् : द्वितीयसत्रम)**
**द्वितीयपत्रम् – संस्कृतव्याकरणम् (ख)**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' 'घ' इत्याख्येषु चतुष खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

## खण्डः क
## (दीर्घोत्तरीयप्रश्नाः)

**निर्देशः** पृष्ठेषु चतुर्षु द्वौ द्वीर्घप्रश्नौ समाधेयौ । **(2×15=30)**

1. 'परः सन्निकर्षः संहिता' इति सूत्रं भाष्यरीत्या व्याख्यायताम्।
2. 'अनुबन्ध एकान्त उतानेकान्तः' इति 'तस्य लोपः' इति सूत्र भाष्यपूर्वकं व्याख्यायताम्।
3. 'बहुषु बहुवचनम्' इतिसूत्रमनुसृत्य सुपां केऽर्था इति विविच्यताम्।
4. 'पूर्ववत्सनः' इतिसूत्रे पूर्वग्रहणं सनपेक्षमुत योगापेक्षम्?

## खण्डः ख
## (लघूत्तरोयप्रश्नाः)

**निर्देशः** पृष्ठेषु सप्तसु चत्वारो लघुप्रश्नाः समाधेयाः। **(4×5=20)**

1. 'व्यक्तवाचां समुच्चारणे' इत्यत्र व्यक्तवाचामिति किमर्थम्?
2. 'कर्त्तरि कर्मव्यतिहारे' इत्यत्र कर्तृग्रहणं किमर्थम्?
3. 'कृद्ग्रहणे परिभाषायाः कानि प्रयोजनानि? एषा परिभाषा कर्त्तव्या न वा?
4. 'जुगुप्साविरामप्रमादार्थानामुपसङ्ख्यानम्' इत्येतदावश्यकं न वा?
5. 'क्रियाग्रहणम्' इति वार्तिकं व्याख्यायताम्।
6. 'ते प्राग्धातोः' इत्यत्र प्राग्धातुवचनं किमर्थम्?
7. क्रुधद्रुहेर्ष्यासूयेतिसूत्रे किमेत एकार्थाः, आहोस्विन्नानार्थाः?

## खण्डः ग
## (अतिलघूत्तरीयाः प्रश्नाः)

**निर्देशः** पृष्ठेषु त्रयोदशसु दश अतिलघुप्रश्नाः समाधेयाः। **(10×01=10)**

1. 'मा समृत' इत्यत्र को धातुः कश्च प्रत्ययः?
2. 'संप्रहरन्ते राजानः' इत्यत्रात्मनेपदं केन?
3. का एका सञ्ज्ञा भवति आ कडारात्?
4. 'डु' इति संज्ञया किमवगम्यते?
5. 'यू स्त्र्याख्यौ नदी' इत्यत्र यूग्रहणं किमर्थम्?

6. कारकसञ्ज्ञाया अन्वर्थतां ज्ञापयन्तु।
7. ध्रुवपदस्य किमर्थं ग्रहणमपादानसञ्ज्ञायाम्?
8. 'पराजेरसोढः' इतिसूत्रस्य कान्युदाहरणानि?
9. श्रच्छब्दस्योपसर्गसञ्ज्ञायां किं प्रयोजनम्?
10. अनुर्लक्षणे इतिसूत्रस्य किमुदाहरणम्?
11. 'अधिपरी अनर्थकौ' इत्यत्रेको यणचि कथन्न?
12. वृत्तिः कतिधा वर्णोच्चारणपक्षे?
13. विभक्तिश्चेति सूत्रेण कस्य का संज्ञा विधीयते?

## खण्डः घ

### (वस्तुनिष्ठप्रश्नाः)

**निर्देशः** पृष्टा वस्तुनिष्ठप्रश्नाः समाधेयाः। **(10×01=10)**

1. प्रयोजकस्य का सञ्ज्ञा भवति?
   (अ) कर्ता (ब) हेतुः
   (स) उभयम् (द) नोभयम्
2. कतमच्छुद्धम् ?
   (अ) अजा नीयते ग्रामम् (ब) अजा नीयते ग्रामः
   (स) अजां नीयते ग्रामः (द) अजां नीयते ग्रामम्
3. भयहेतुरित्यत्र कः समासः ?
   (अ) पञ्चमीतत्पुरुषः (ब) षष्ठीतत्पुरुषः
   (स) द्वन्द्वः (द) अव्ययीभावः
4. यचि भमित्यत्र किं निर्दिश्यते ?
   (अ) य्-अच्-इ (ब) य-अचि
   (स) य-अ-चि (द) य्-अ-चि
5. कतमच्छुद्धम् ?
   (अ) संचकर्तुः (ब) संचस्कर्तुः
   (स) संचस्करतुः (द) न कोऽपि
6. स्त्रैणिरित्यत्र कः प्रत्ययः ?
   (अ) इञ् (ब) इन्
   (स) इक् (द) इच्
7. 'प्राद्रुवत्' इत्यत्र को लकारः ?
   (अ) लिङ् (ब) लङ्
   (स) लुङ् (द) लृङ्
8. पदसञ्ज्ञाविधायकानि सूत्राणि कति ?
   (अ) द्वे (ब) चत्वारि
   (स) त्रीणि (द) षट्
9. क्त्मसञ्ज्ञया किमवगम्यते ?
   (अ) अपरिसमाप्तं कर्म (ब) परिसमाप्तं कर्म
   (स) अकथितं कर्म (द) सर्वम्
10. षष्ठीयुक्तश्छन्दसि वेतिसूत्रेण कस्य विकल्पो विधीयते ?
    (अ) समासस्य (ब) नदीसञ्ज्ञायाः
    (स) ह्रस्वस्य (द) घिसंज्ञायाः

---------------x---------------